# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2018 - '19

**Class : IX** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

| | | |
|---|---|---|
| खण्ड: क अपठित अवबोधनम् | – | 5 अङ्का: |
| खण्ड: ख रचनात्मकं कार्यम् | – | 15 अङ्का: |
| खण्ड: ग अनुप्रयुक्त व्याकरणम् | – | 25 अङ्का: |
| खण्ड: घ पठित अवबोधनम् | – | 35 अङ्का: |

## खण्ड: क (अपठित अवबोधनम्)

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

विज्ञानस्य नवीनेषु आविष्कारेषु एक: अतीव उपयोगी आविष्कार: अस्ति चलभाषितयन्त्रं मोबाइल् इति। अस्य मुख्यं प्रयोजनमासीत् दूरवर्तिना केनापि जनेन सह वार्तालाप: सुकर: भवेत् इति। परमद्यत्वे तु चलभाषितयन्त्रं लघुसङ्गणकमिव वर्तते। एवं प्रतीयते यत् जना: हस्ते एकं सम्पूर्णं जगत् एव नयन्त: गच्छन्ति। अनेन ते न केवलं वार्तां कुर्वन्ति अपितु वार्तया सहैव वक्तारं साक्षात् पश्यन्त्यपि। ईमेल फेसबुक् व्हाट्सएप् माध्यमै: एतदतीव सुकरं सन्देशवाहकमपि।

अस्य माध्यमेन गमनागमनार्थं शीघ्रमेव वाहनं प्राप्य जना: सरलतया स्वगन्तव्यं प्राप्नुवन्ति। न केवलमेतदेव अपितु एतत् यन्त्रं मनोरञ्जनकारि अपि। बाला: वृद्धा: युवान: अस्य माध्यमेन विविधक्रीडाभि: मनोरञ्जनक्षमा: भवन्ति। परमेतदपि विचारणीयं यदस्य अधिकाधिकप्रयोग: हानिकर: भवति। अति सर्वत्र वर्जयेत् इत्यनुरूपेण अस्य यथावकाशं प्रयोग: एव करणीय:।

**I. एकपदेन उत्तरयत।** **1**

क. किम् अतीव सुकरं सन्देशवाहकम्?
ख. जना: वार्तया सह कं पश्यन्ति?

**II. पूर्णवाक्येन उत्तरयत।** **2**

क. अस्य मुख्यं प्रयोजनं किम् आसीत्?
ख. अस्य प्रयोगेन के कथं च मनोरञ्जनक्षमा: भवन्ति?

**III. भाषिककार्यम्।** **2**

क. लब्ध्वा इत्यर्थे किं पदं गद्यांशेऽस्मिन् प्रयुक्तम्?

ख. अस्य यथावकाशं प्रयोगः एव करणीयः इति अत्र क्रियापदं किम्?

ग. गद्यांशात् एकं अव्ययपदं चित्वा लिखत।

घ. अस्य मुख्यं प्रयोजनमासीत् -------- अत्र अस्य इति पदं कस्मै प्रयुक्तम्?

## खण्डः ख (रचनात्मकं कार्यम्)

**2. भवतः भ्राता गोपालः पठनं त्यक्त्वा खेलने संलग्नः। तं पठनार्थं प्रेरितं कुर्वता लिखितं पत्रं प्रदत्तैः पदैः पूरयत।** **5**

(प्राप्तम्, उचितम्, अद्यत्वे, छात्रावासतः, मन्ये, अग्रजः, गोपाल, आवश्यकम्, त्यक्त्वा, न्यूनाः)

क. --------

दिनाङ्कः ---------

प्रिय ख. --------

शुभाशीष।

ह्यः एव मात्रा लिखितं पत्रं ग. --------- पठित्वा ज्ञातं यत् घ. --------- भवतः रुचिः पठने न अस्ति। भवान् पठनं ङ. ------ खेलने रतः अस्ति, एतद् तु न च. ----------। अस्मात् कारणात् एव गत परीक्षायां भवतः अङ्काः छ. -------- आसन्। यद्यपि खेलनम् अपि जीवनाय ज. -------- परं पठनम् अपि तथा एव अनिवार्यम्। ये कालं व्यर्थं नयन्ति ते कदापि सफलतां न प्राप्नुवन्ति। झ. -------- त्वं मम कथनं मनसि धृत्वा पठने एव ध्यानं दास्यसि। मातृपितृभ्यां मे प्रणामाः।

भवतः ञ. --------

सोमेशः

**3. अधोलिखितं चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि लिखत।** **5**

(बालः, पश्यतः, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति)



**4. संस्कृतभाषायाम् अनुवादं कुरुत।** 5

क. Students write an essay. ख. We will pray to God. ग. People walked.

घ. What did you both eat? ङ. Cooks are cooking food.

## खण्डः ग (अनुप्रयुक्त व्याकरणम्)

**5. अधोलिखितयोः शब्दयोः उचितवर्णसंयोजनं विन्यासं वा कुरुत।**

**I. रिक्तस्थानं पूरयत।** 1

क. आकर्षणम् = आ + क् + अ + ------- + ष् + अ + ण् + अ + म्

ख. म् + आ + र् + म् + इ + क् + अ + म् = -----------

**II. उच्चारणस्थानानि।** 2

क. 'ऋ' वर्णस्य उच्चारणस्थानं किम्?

ख. 'यदि' शब्दे कः वर्णः दन्त्यः अस्ति?

**6. अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिं सन्धिविच्छेदं वा लिखत।** 4

क. हिमालयस्य सानोरुपरि कञ्चनपुरं विभाति।

ख. तत्+यामि कार्येण इत्युक्त्वा स्वकर्मव्यग्रो बभूव।

ग. पितामहः पितामही च त्वाम् + मारयतः।

घ. गर्विततया बालिकया प्रोक्तम्।

**7. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत।** 6

क. --------- पिता अध्यापकः अस्ति। (रमा)
(रमयाः, रमायाः, रमायै, रमा)

ख. --------- अग्निः जायते। (काष्ठ)
(काष्ठम्, काष्ठेन, काष्ठात्, काष्ठाय)

ग. विद्यालयस्य विद्यालयत्वं --------- भवति। (छात्र)
(छात्राभ्यां, छात्रैः, छात्रे, छात्रस्य)

घ. --------- उद्याने चत्वारः आम्रवृक्षाः सन्ति। (तत्)
(तस्मिन्, तस्य, ते, तम्)

ङ. वृक्षस्य शाखायां --------- खगौ अतिष्ठताम्। (द्वि)
(द्वे, द्वौ, द्वाभ्यां, द्वयः)

च. ---------- ग्रामे एकः वृद्धः आसीत्। (एक)
(एके, एकस्य, एकस्मिन्, एकः)

**8. अधोलिखित वाक्येषु कोष्ठके प्रदत्तधातूनां क्रियापदानां समुचितपदं किं भविष्यति?** 3

क. सर्वे सुखिनः ----------। (भू, लोट्, लकारे)

ख. अद्य मम पिता आगतः श्वः सः ---------। (गम्, लृट्, लकारे)

ग. ये परिश्रमं कुर्वन्ति ते सफलतां -----------। (लभ्, लट्, लकारे)

**9. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत। 4**

क. --------- उपरि विलोक्य बालिका आश्चर्य चकिता जाता। (वृक्ष)

ख. स्वस्ति -----------। (प्रजा)

ग. बालः --------- सह खेलितुं गच्छति। (मित्र)

घ. ---------- बहिः क्रीडाक्षेत्रम् अस्ति। (विद्यालय)

**10. रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य वा विभज्य वा लिखत। 3**

क. गृहम् आ +गम् + ल्यप् बालिकया मञ्जूषा समुद्घाटिता।

ख. बालः क्रीडितुं निर्जगाम ।

ग. इति वद् क्त्वा काकः तिस्रः मञ्जूषाः निस्सारयति।

**11. उपसर्गं संयोज्य वा विभज्य रिक्तस्थानानि पूरयत। 2**

क. विडालः मूषकम् ----------- (अनु, सृ, लट्)

ख. माम् इयम् अधिक्षिपति।

## खण्डः घ (पठित अवबोधनम्)

**12. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

**अ. गद्यांशम्**

अथ पित्रा 'तथा' इति अभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुम् उपगम्य उवाच - देव! त्वया अस्मत्पूर्वेषाम् अभीष्टाः कामाः पूरिताः, तन्ममैकं कामं पूरय। यथा पृथ्वीमदरिद्रां पश्यामि, तथा करोतु देव'' इति। एवंवादिनि जीमूतवाहने "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात् तरोरुदभूत्। क्षणेन च स कल्पतरुः दिवं समुत्पत्य भुवि तथा वसूनि अवर्षत् यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

**I. एकपदेन उत्तरयत। 2**

क. जीमूतवाहनः कस्य समीपं गच्छति?

ख. कस्य यशः सर्वत्र प्रथितम्?

**II. पूर्णवाक्येन उत्तरयत। 2**

क. जीमूतवाहनः कल्पतरुं किम् अकथयत्?

ख. जीमूतवाहनस्य यशः सर्वत्र कथं प्रथितम्?

**III. भाषिककार्यम्। 2**

क. धनानि इति पदस्य अर्थे किं पदं प्रयुक्तम्?

ख. त्यक्तः त्वया --------। अस्मिन् वाक्ये त्वया इति पदं कस्मै प्रयुक्तम्?

ग. तन्ममैकं इति पदस्य सन्धिच्छेदं कुरुत।

घ. जीमूतवाहनः इति विशेष्यपदस्य विशेषणपदं किम्?

**आ. पद्यांशम्**

पिबन्ति नद्यः स्वयमेव नाम्भः

स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः ॥

**I. एकपदेन उत्तरयत।** **2**

क. सतां विभूतयः किमर्थं भवन्ति?

ख. काः जलं न पिबन्ति?

**II. पूर्णवाक्येन उत्तरयत।** **2**

क. वारिवाहाः किं न कुर्वन्ति?

ख. फलानि के न खादन्ति?

**III. भाषिककार्यम्।** **2**

क. 'वृक्षाः' इति कर्तृपदस्य क्रियापदं किम्?

ख. 'खादन्ति' इति पदस्य अर्थे किं पदं प्रयुक्तम्?

ग. नाम्भः इत्यस्य सन्धिच्छेदं कुरुत।

घ. परोपकाराय इत्यत्र का विभक्तिः भवति?

**इ. नाट्यांशम्**

(ततः प्रविशति करतलाभ्यां चक्षुषी मार्जयन्ती पञ्चवर्षदेशीया बालिका सोमप्रभा)

विमला – अये जागरिता! त्वरस्व तावत्। परिहीयते विद्यालयगमनवेला।

सोमप्रभा – अम्ब! अद्य न गमिष्यामि विद्यालयम्।

विमला – (हस्तेन सोमप्रभां गृहीत्वा) अये किमेतत् कथयसि। विद्यालयस्तु गन्तव्य एव प्रतिदिनम्।

(सोमप्रभायाः प्रस्थानम्)

श्वश्रूः – विमले! अयि दुष्टे! कुत्र मृतासि? कियतः कालात् शब्दापयामि?

विमला – (सकरुणं निशम्य) इयं मम श्वश्रूः सदैव मर्मघातिभिः कटुवचनैराक्षिपति माम्। (उच्चैः स्वरेण) अम्ब! इयमागच्छामि। किं करणीयम्? (परिक्रामति)।

**I. एकपदेन उत्तरयत।** **2**

क. कस्याः श्वश्रूः कटुवचनैः आक्षिपति?

ख. बालिका कति वर्षीया आसीत्?

**II. पूर्णवाक्येन उत्तरयत।** **2**

क. बालिका किं कुर्वन्ती प्रविशति?

ख. विमला हस्तेन सोमप्रभां गृहीत्वा किं वदति?

**III. भाषिककार्यम्।** **2**

क. आक्षिपति इति क्रियापदस्य कर्तृपदं किम्?

ख. 'इयम् आगच्छामि' अत्र इयं सर्वनामपदं कस्यै प्रयुक्तम्?

ग. 'निशम्य' इत्यत्र कः प्रत्ययः अस्ति?

घ. शीघ्रतां कुरु इति पदस्य अर्थे किं पदं प्रयुक्तम्?

**13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत। 5**

क. वसन्ते कोकिला: कूजन्ति ।

ख. कुक्कुर: मानुषाणां मित्रम् अस्ति।

ग. अस्मिन् संसारे परोपकार: अनश्वर: अस्ति।

घ. सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।

ङ. दुष्टाया: अधरधोत्तरम् श्रृणुत।

**14. निम्नलिखितपद्यद्वयस्य अन्वयं पूरयित्वा पुनः लिखत। 4**

अ. लतानां नितान्तं सुमं शान्तिशीलम्
चलेदुच्छलेत्कान्तसलिलं सलीलम्,
तवाकर्ण्य वीणामदीनां नदीनाम् ॥

अन्वय: – तव क. ------- वीणाम् ख. ----- लतानां नितान्तं ग. -------
सुमं चलेत्, नदीनाम् घ. -------- सलिलम् उच्छलेत्।

आ. प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तव:।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

अन्वय: – सर्वे क. -------- प्रियवाक्यप्रदानेन ख. --------। तस्माद् तत्
ग. --------- वक्तव्यं वचने घ. -------- दरिद्रता।

**15. घटनाक्रमानुसारं लिखत। 4**

क. काकं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्ध।

ख. सूर्योदयात्पूर्वमेव बालिका तत्र उपस्थिता।

ग. स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं परिवेषितम्।

घ. स्वर्णसोपानेन सा बालिका स्वर्णभवनमाससाद।

ङ. पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्।

च. लघुतमां मञ्जूषां प्रगृह्य बालिका गृहं अगच्छत्।

छ. अहं तुभ्यं तण्डुलमूल्यं दास्यामि।

ज. एक: विचित्र: काक: समुड्डीय ताम् उपाजगाम।

**16. अधोखितवाक्येषु रेखाङ्कितपदानां कृते उचितम् अर्थं चित्वा लिखत। 4**

क. तन्द्रालु: बाल: उद्यानं प्रविवेश।
(अलस:, सरल:, सुन्दर:, उत्तम:)

ख. यत्नेन वृत्तं रक्षेत्।
(धनम्, चरित्रम्, विकारम्, अन्नम्)

ग. बालिकां विलोक्य प्राह।
(उवाच, अहसत्, प्राप्नोत्, प्राप्तम्)

घ. सरसा: रसाला: वसन्ते लसन्ति।
(रसा:, भ्रमरा:, आम्राणि, कोकिला:)